विदितकमनं ताभोगं वारिताशमरीतिदम् ।
वितरति पदं सद्भ्यो यद्वै सुरासुर संस्तुतं,
विदितक-मनन्ताऽभोगं वाऽरिताश-मरीतिदम्

(शार्दूलविक्रीडितं वृत्तम्)

श्रीमच्छ्रीवसुपूज्यराजतनय श्रीवासुपूज्य प्रभो ! ,
न त्वा केवलिनं सदार्यमसमं भव्या महं पावनम् ।
विश्वाधीश लभन्ति नोच्चपतमं देवावली सेवितं ,
नत्वा-के वलिनं सदार्यमसमं भव्यामहं पावनम् ॥ १ ॥

अर्हन्तोद्भुत बोधिबीजजलदा देयासुरुच्चैः समे ,
ते तत्त्वानि भृतप्रभावनिकरा विज्ञातमोदानि मे ।
ये विश्वे सुविधीन् ययुः शिवपदं स्वाज्ञारमासम्भिशा-
ते तत्त्वा निभृतप्रभावनिकरा विज्ञातमोदानि मे ॥ २ ॥

वाणी ते जिननाथ ! कल्मषहरा देयादमंदा-मुदं ,
सद्योगांगदकामला भवपरा भूतिप्रदाऽनाविला ।
या तापं प्रणिहन्ति संतत महोदत्तेसतां निर्वृत्तिं ,
सद्योगांऽगद कामलाऽभवपरा भूतिप्रदानाऽविला ॥ ३ ॥

देवी शान्तिकृदस्तु सा सुरनरैर्या स्तूयते नित्यशः,
श्रीशान्ति वैरलासनाऽमरहिता वित्रासितााराऽजरा ।
पाणौ राजति कुण्डिकामृतभृता यस्याः परा निर्मिता-
श्री शान्ति वैरला सनाऽमरहिता वित्रा-सिता-राजरा ॥४॥

व्याख्या—हे श्रीवासुपूज्य ! के नरा पावन पवित्रं महं-उत्सवं न लभन्ति किन्तु सर्व्वेऽपि । त्वा-त्वा नत्वा प्रणम्य केवलिन सदार्यमसमं सदा अर्यम्णा सूर्येण समं-तुल्यं भव्यामह भविनां आमान्-रोगान् हन्तीति । पावनं पाया रक्षाया वनं उद्यानं बलिनं बलसहितं सता आर्यं स्वामिनम् ॥ १ ॥

ते इमे समे सर्व्वेऽर्हन्तो मे-महयं तत्त्वानि देयासुः । किंलक्षणाः भृतप्रभावनिकरा -भृतप्रभावसमूहा । किंलक्षणानि तत्त्वानि विज्ञातमोदानि-विज्ञातो मे

मानन्दो यैस्तानि ये विघ्ने -सुविधीन् श्रीभनाचारान्, तत्त्वा विस्तार्य शिवपदं ययुः, स्वाजारमाया. सविश्रान्ते-सद्गृहे निमूलप्रभापनिचराः निर्मला निश्चला प्रभा क्षान्तिर्यस्यामवर्णा धारायां तस्या कं मुक्तं गतिं ददति ,ये ते मुक्तिमुखप्रदा इति भावः। विज्ञातमोदान विघ्नेभ्योऽतमं पुण्य ददति ये ते तान ॥ २ ॥

हे जिननाथ ! ते तव वाणी मुद देयात् । सद्यस्तत्कालं गांगश्वा्लसा गंगाया इदं गांगं स्वच्छं नीरं तद्वदमला भवपराभूतिप्रदा भवस्य पराभूतिं-पराभवं प्रदाति छिनत्ति । अनाविला शुद्धा महा प्रधानो योग मद्योग तस्यांगानि सा-खायामादीनि ददातीति, तस्य सम्बोधनम् । कामसा कामं लुनातीति । अभव-दरा मोक्षपरा, भूतिप्रदाना भूते प्रदान यस्या सा । अमिला न विद्यते विलं भ-रक यस्या सा ॥ ३ ॥

वरला हंसी आसनं यस्या सा । अमरहिता रोगरहिता विघ्नानितारा विशालित आरं अरिसमूहो यया सा । अजरा निर्मिता श्री शान्तिः निर्मिताकृता श्रियाः अलक्ष्म्याः शान्ति यया सा । वरला वरं लाति-ददाति या सा । सदा-सना अमरहिता अमरेभ्यो हिता विज्ञा विद्ज्ञानं त्रायते या सा विज्ञा । सिता उज्ज्वला राजरा राजाचन्द्रस्तद्वत् रा दीप्ति र्यस्या ॥ ४ ॥

श्रीविमल-जिन-स्तुतिः ।

(पृथ्वी छन्दः)

जगज्जनितमंगलं कलितकीर्तिकोलाहलं,
नमामि विमलं हितं दलितविग्रहं भावतः।
सुखानि वितरत्यलं चरणपंकजं यस्य मत्,
नमामि विमलं हितं दलितविग्रहं मायतः ॥ १ ॥

जिना जनितविस्मया जगति विस्फुरत्कीर्त्तिभि—
र्जयंति कलमापलाः शमनदीनतादायिनः ।
यदंघ्रिवरसेवया सुखयशांसि भव्या जनेऽ—
र्जयन्ति कलमामलाः शमनदीनथादा यिनः ॥ २ ॥

मतं जिनवरोदितं जयति विस्फुरद् वादिसत्,
सभाऽजित-मलंघनं परमतापहं यामरम् ।
मनोभिलषितां ददत्परसुरासुरैर्भक्तितः,
सभाजित-मलं घनं परमतापहं यामरम् ॥ ३ ॥

शरासनवरासिभृज्जयति जात-मोदा सदा,
पराऽपरहिताऽऽयता सुरवराजिता रोहिणी ।
विशुद्धसुरभी-महो ! सुरुचिराक्षमालाधरा-
पराऽपरहिताऽऽयता सुरवराजितारोहिणी ॥ ४ ॥

व्याख्या—अर्हं त विमल नवानि स्तवीमि । दलितविग्रह विकसितश-
रीर भावतः शुभभावात् यस्य चरणपंकजे सुखानि नवानि वितरति वस्तं । की-
दृश दलितो विग्रहः सङ्ग्रामो येन तत् । कीदृशस्य यस्य भावतः कान्तिमत ॥ १

जिना जयन्ति । किलक्षणाः कलमामला कला रम्या मा श्रिय मलते धार-
यन्तीति । शमनदीनतादायिन. शमनस्य यमस्य दीनता ददनीत्येवंशीला. । भव्या
यत्पादसेवया सुखयशांसि अर्जयन्ति । कलमामला. कलम् शालिस्तद्वदमला
शमनदीनतादा शमस्य नदीनता समुद्रत्वं ददतीति नदीनामिन नदीनस्तस्य
भाव । यिन या श्री विद्यते येषा ते यिनः ॥ २ ॥

मतं जिनोक्तं जयति । वादिसत्सभाजितं वादिना सत्सभयाऽजितं अल-
घनं लघयितुमशक्य परमतापह परमं तापं हन्तीति तं । याम व्रतसमूह रातीति
तं । मनोभीष्टा या लक्ष्मीं सभाजित पूजित अल भृश घन परमतापह परमतं
अपहन्तीति । या श्रिय अर अत्यर्थं ददत् ॥ ३ ॥

रोहिणी जयति । परा प्रकृष्टा अमरहिता रोगरहिता आयता विस्तीर्णा
सुरनराजिता-सुरवरैरजिता विशुद्धसुरभीं धेनु आरोहिणी । अपरा न विद्यन्ते
परे-शत्रवो यस्याः सा । अमरहिता देवेभ्यो हिता आयता, सुरवराजिता आयो
लाभस्तां श्रीः असवः प्राणा रवः शब्दस्तैः राजिता ॥ ४ ॥

श्रीअनन्त-जिन-स्तुतिः ।

(द्रुतविलंबित छन्दः)

अतनुतापद-मेन-मदारुणं,
जिनमनन्त-मनन्तगुणं श्रये ।
अतनुता-पदमेन मदारुणं,
य इह-मोह-महो ! विभुरस्मयम् ॥ १ ॥

अशमिनो मतिदानरमाभृतः,
अपयता-ज्जिनराजगणः स नः ।
अशमिनोऽमतिदानरमाभृतः,
समजयद्य इहात्मरिपून् क्षणात् ॥ २ ॥

अकृतकं दलिताहितसम्पदं,
जिनवरागम-मेन-मुपास्महे ।
अकृत कं दलिताऽऽहितसंपदं,
य इह वादिगणं न मदोज्झितम् ॥ ३ ॥

समरसादितदानवतानवाऽ-
वतु नतान् धृतदीप्तिरिहाच्युता ।
समरसाऽदितदा नवताऽनवा,
सदसि चापकरा हयगामिनी ॥ ४ ॥

व्याख्या—एनं अनन्त जिनं अहं श्रये सेवे । किंलक्षणं अतनुतापद अ-नतोः कामस्य तापं ददातीति तं । अदारुणं अरौद्रं सौम्यं एनं क ? यो विभुर्मोह । अहो ! इति आश्चर्ये अस्मयं निरहंकारं अतनुत अकृत, किंलक्षणं अपदमेनम-दारुणं अपगतो दमो यस्मात् सः अपदमः तस्य इन स्वामी । मदेन अरुणः मदारुणः अपदमेनश्चासौ मदारुणश्च त ॥ १ ॥

स जिनराजगण नोऽस्माकं अशं असुखं शमयतात् । इनः स्वामी किंलक्षणः मतिदानरमाभृत. मतिश्च दानं च रमा च ता बिभर्तीति । भृत शब्द स्वरान्तो व्यजनान्तश्च । य इह आत्मरिपून् अन्तरद्विष समजयत् जिगाय । किंलक्षणान् अशमिन अशमो वियते अशमिनः तान् अमतिदान् । पुनः किंलक्षणान अरमाभृतः अरमा बिभ्रतीति अरमाभृतः तान् ॥ २ ॥

वयं एनं जिनवरागमं उपास्महे सेवामहे । कीदृश अकृतक नकृतक शाश्वतं दलिताहितसपदं दलिता खंडिताऽहिताना वैरिणा सपद, श्रियो येन तं । यो जिनागमः कं वादिगण मदवर्ज्जित मदरहितं न अकृत न चकार अपितु सर्व्वमपि । कीदृशं तं दलिताहितसपद दलिता विकसिता आहिता निश्चला सपदः पद विशेषा यत्र त ॥ ३ ॥

अच्युता अच्छुप्तादेवी नतान् अवतु । किंलक्षणा समरसादितदानवतानवामरेसादितं खेदितं दानवाना तानवन्तयो भावो यया सा । समरसा सम मर्शको रसो यस्याः सा । अदितता अदिता अखण्डिता ता श्री यस्याः सा । अनवा पुराणा ॥ ४ ॥

श्रीधर्म्म-जिन-स्तुतिः ।

(अनुष्टुब् छन्दः)

भवतेऽकलितापाय, श्रीधर्म्म ! नमतीह यः ।
भवतेऽकलितापाय ! स नरः पदमव्ययम् ॥ १ ॥
नयेहन्त-मुदारामं, जिनस्तोमं स्मृतिं सदा ।
नयेहन्त मुदारासं, रतः शिश्राय यः शिवम् ॥ २ ॥
भविकन्दर्पहन्तारं, श्रये सिद्धान्त-मेतकम् ।
भविकं दर्प्पहन्तारं, लभन्ते यजुषो द्विषाम् ॥ ३ ॥
पशाभूतिकराऽरीणां, प्रज्ञसी पातु नः समा ।
पशाभूति-करारीणां, दधानाऽसि लतां करे ॥ ४ ॥

व्याख्या—हे श्रीधर्म ! यो नरः प्रवृते तुभ्य नमति इह । किंलक्षणाय अकलिताय कलिश्च तापश्च तौ न विद्यते यस्य स अकलिताप. तस्मै । हे अकलि-ताप ! हे गतविघ्न ! स नरः अव्यय पद मवते प्राप्नोति ॥ १ ॥

उदाराम उदारज्ञान यो मोक्ष आश्रितवान् । न्यायस्थितः सुदागम हर्षे-ण गामं रम्य ॥ २ ॥

भविना कन्दर्प हन्तार सिद्धान्त धत्ते । यत्तुपो भवका भविके कल्याण लभन्ते । हिमा स्वर्णहं, तारं उज्वल ॥३ ॥

अरीणा पराभूतिं करोतीति । अरीणा अर्चाणा आसत्तना दधाना नि-भाणा ॥ ४ ॥

श्री शान्ति-जिन-स्तुतिः ।

(शार्दूलविक्रीडितं वृत्तम्)

विश्वाधीश्वर विश्वसेनतनय स्तुत्वा भवन्तं न के,
शान्ते ! नोदितमार ! तारकलया धाराजनामोदकम् ।
सौख्यं के परमं लभन्ति न बुधाः कामाग्निशान्तौ सदा,
शान्तेनोदितमार ! तारक ! लयाधाराज ! नामोदकम् ॥१॥

अर्हन्तो ददता-ममन्द-मसमानन्दाः सदानन्दनाः;
मोदंते जनितानवप्रशमनादा नाम लाभावराः ।
नुत्वा यानिह कामितासि यशतो विद्वज्जना निर्भरं,
मोदन्ते जनितानव प्रशमना दानामलाभावराः ॥ २ ॥

जीयाज्जन्तुहितं करैं जिनवरै-रुक्तौगणेशै धृतः,
सिद्धान्तो दितभावरोगविसरो जन्मप्रभारामकः ।
शुद्धादि विविधार्थ सार्थ रुचिरो सद्वादिदर्पापहः,
सिद्धान्तोऽदितभाववरो गयि सरोजन्मप्रभारापकः ॥ ३ ॥

दण्डच्छत्रधरोऽवतात् स-भवतः श्रीब्रह्मशान्तिः सतां,
मूर्द्धन्यो वरदामराजितकरो राजावली शोभितः ।
या जीयन्त इहापरैर्नवितरे तुष्टः परायः श्रियो,
मूर्द्धन्यो वरदाऽमराजित करो राजा बलीशोऽमितः ॥ ४ ॥

व्याख्या—हे शान्ते ! हे नोदितमार ! के के बुधा परमं सौख्यं न न जभन्ति ? अपितु सर्व्वे । भवतं स्तुत्वा, कीदृश तारनतया रम्यकलया, धारा-जनामोदकं-धारा क्षोणी तस्या जनान् आमोदयतीति । पुनः कीदृशं कामाभि-शान्ती नाम इति सत्ये, उदकं नीरं हे शान्तेन । शान्तानां मुनीनां इन स्वा-मिन् ! हे उदितमार ! उदिता मा श्रिय राति ददातीति । हे तारक ! हे लया-भार ! हे अज ! जन्मरहित ॥ १ ॥

ते अर्हन्तो जिना मोदं ददता कीदृशा जनितानवप्रशमनादाः जनित अनव प्रशमस्य नादो यैस्ते नाम । लाभावरा लाभश्च अवश्च तौ राति ददति ये । मोदन्ते-हर्षन्ते । जनितानवप्रशमनाः जनिर्जन्म तानवं कृशत्व ते प्रशमयन्ति इति । दानामलाभावरा-दानेन अमला भयावराः प्रधाना ॥ २ ॥

सिद्धान्तो जीयात् । कीदृशः दितभावरोगविसर दितश्छिन्नो भावरो-गविसर, समूहो येन सः । पुनः कीदृश जन्मप्रभारामक जन्मना प्रभारः समूहः तत्र अमक रोगममः अदितभावरः अदिता अखण्डिता या भा कान्तिः तयावरः, गवि पृथिव्या सरोजन्मप्रभारामक सरोजन्म कमल तस्य प्रभावत् रामको रम्य निर्मला आदि यस्य नानार्थसमूहरम्यः परवादिमद स्फेटकः निष्पक्षः अन्तो यस्य ॥ ३ ॥

सतां मूर्द्धन्यो मुकुट वरेणदाम्ना राजितो करो यस्य सः । 'यक्ष पुण्य-जनो राजा' इत्यभिधानत । राजावली—यक्षश्रेणिः तया शोभित दण्डच्छत्रे वर-तीत्य स । तुष्ट, इह अमूः श्रियो वितरेत् दत्त । कीदृशः वरदश्चासौ अम-रैरजितः अमराजितश्च करमुख्य रानि ददाति सः । पश्चात्कर्मधारयः । राजा यक्षाधिप बलीश बलिना प्रभु अमित सामस्त्येन ॥ ४ ॥

श्रीकुन्थु-जिन-स्तुतिः ।

(मालिनी छन्दः)

प्रणमत भवभीतिच्छेदकं कुन्थु-माभा,
जिन-मिन-मितमानं सावधानं दधानम् ।
सुरनरनुतपादं विघ्नदैत्य प्रणाशे,
जिन-मिनमितमानं सावधाऽऽनंदधानम् ॥ १ ॥

जिननिचयमुदारं नौमितं प्राप्तपारं,
त्रिशदशम-मपारं मंदमालोपयुक्तम् ।
वचनमिह यदीयं संयमं राति सङ्ख्योऽ—
त्रिशदशम-मपारंमं दमालोपयुक्तम् ॥ २ ॥

वितरतु मतिभारं मेति-सारं जिनानां,
मतमसमऽलयाऽलंकार-मायामतारम् ।
हरति यदिह वेगाद्राति नोवाश्रितानाम्—
मतमसमऽलयालं कारमा यापतारम् ॥ ३ ॥

द्युति-तति निभृताशा सौरभी वाहनं या,
कलयति नरदत्ता शासिता-राति-जाता ।
भवतु मम मुदे मा सर्व्वदोदारदेहा,
कलयति-नर-दत्ताशाऽसि ताराऽतिजाता ॥४॥

व्याख्या—हे जनाः ! कुन्थुं जिन प्रणमत । इनं इनमानं गताहंकार साव-धान अप्रमत्तं आभाः कान्ती दधानं जिन नारायण अतरायदैत्यनाशे इनमित-मानं ए, कामस्य नमित मानं प्रमाण येन स न । पुनः किंलक्षणं सावधानद-धानं सह अवधेन अहिंसालक्षणेन वर्तते इति सावधः आनन्दस्य धानं पश्चात्

कर्मधारयः ॥ १ ॥

निर्म्मलशम अपारं गतवैरिसमृद्ध भंवमालोपयुक्तं कल्याणमालासहितं । कीदृशं सयम अविशत अशमं अपारंभं गतारंभं दमालोपयुक्तं दमस्य अलोपेन युक्तं ॥ २ ॥

जिनाना मतं कर्तृ । कीदृशं अममो लयोऽलंकारो भूषणं यस्य तत् । आयामेन तारं उज्ज्वलं यत् मतं आश्रिताना अलयालं अपथ्यानोद्यमं हरसि । कारमाका श्रियो न राति न दत्त किन्तु सर्व्वा अपि । यामतारं यामता यम-समृद्धता राति दत्ते तत् ॥ ३ ॥

सा नरदत्तादेवी मम मुदे भवतु । शिक्षित-वैरिवर्गा या महिषीवाहन-मंगीकरोति । कलयनीना नराणा दत्ताशा । असिना तारा उज्ज्वला अतिजाता कुलीना ॥ ४ ॥

श्री अर जिन स्तुतिः ।

(शिखरिणी छन्दः)

सदारं तीर्थेशं तमिह तमसा-मुत्तमतमं,
महामो हन्तारं निदलित-कला-केलिम-कलम् ।
निहत्योच्चैर्ज्ञानं विशद ममजायावलमहो !,
महा-मोहन्तारं विदलितकलाकेलि मकलम् ॥ १ ॥
जिनानं-धाम स्तान् विशदमभजन् ध्यानमिह ये,
सदाहंसारामं कृत-कमल-मानन्दितरसम् ।
जहू राज्यं प्राज्यं सुरनरधृताज्ञों च सहसा
सदाहं साऽरामं कृतकमलमानन्दितरसम् ॥ २ ॥
जिनोक्तं व्यक्तं श्री निचितमनयापोहनिपुणं,
मतं पाता-द्रव्यान-रम-मलमानन्द्रमवरम् ।

प्रदत्ते यत्सद्भ्यः पर-मदहरं हृद्यमनसा,
मतं पाताद्भव्यानरममलमानन्द्रमवरम् ॥ ३ ॥
सुखं दद्यात् सा मे विशदमिह चक्रायुधधरा-
सुरीत्यक्ताऽश्री-शाकृतिसुरचिताऽरातिविभया ।
उपात्यश्र्याऽऽरूढा नभसि शशिनो या प्रवरया,
सुरीत्यक्ता श्रीरा कृतिसुरचिता राति त्रिभया ॥४॥

व्याख्या—नित्यं अरं जिनं महामः पूजयाम । तमसा हन्तारं विदलित कन्दर्प्पं । अकलं कलयितुमशक्यं । कीदृशं विदलिता विकशित कलाया केति येन तं अकद्धं मदरहित । कड्कमदे ॥ १ ॥

हंसस्य परमात्मन आरामं कृतं कमलानां आधारादीना मानं यत्र तत् । राज्यं सारामं श्रीरम्य कृतकं अलं आनन्दितरसम् ॥ २ ॥

भव्यान् पातात् पतनात् रक्षतु । अरं अमलमान भव्यानर भविना आनान् प्राणान् राति दत्ते यत् । यत् आनन्दं प्रदत्ते । मतं रक्षाप्रद अमलं आमान् रोगान् लातीति ॥ ३ ॥

चक्रायुधधरा चक्रेश्वरी सुरि मे सुख्य दद्यात् । कीदृक् त्यक्ताऽश्रीः त्यक्ताऽलक्ष्मीः आकृतिसुरचिता—अराति विभया,आकृत्या सुरचित निर्णाटिसं अरातीनां वैरिणां विशिष्ट भय यया सा । या प्रवरया विभया कान्त्या शशिनश्चन्द्रस्य त्रपां राति दत्ते । कीदृक् सुरी त्यक्ता सुयुक्तिमहिता श्रीरा लक्ष्मीप्रदा कृतिसुरचिता कृतिभिः सुरैश्चिता व्याप्ता ॥ ४ ॥

श्रीमल्लि-जिन-स्तुतिः ।

(शालिनी छन्दः)

श्रीमल्लिमीडे कलनीलकायं, त्रिभामयं योग त्रिभासमानम् ।
निराकरोन्मोहबलं क्षणेन, त्रिभामयं यो गवि माऽसमानम् ॥ १ ॥
जयन्ति ते ध्वस्ततमोविकारा, निरा-जिना-मोदितमानतारा: ।

यजन्ति यानत्र नरामरेशा, विराजिनानोदितमानतारा: ॥२॥
जिनेश ! वाक् ते अरनीत्यमे-या,न्देयादमंदानि हितानि कामम् ।
विस्तारयन्ती ददती च विद्या, देया दमन्दानिहितानिकामम् । ३
यक्षाधिप: पातु सहस्तियानो, विभातिरामोऽहितकृत्सुराव: ।
श्रीसंघ रक्षा करणोद्यतो यो, विभाति रामो हितकृत्सुराव: ॥४॥

व्याख्या—श्रीमल्लि इति स्तुवे । विभामयं कान्तिमयं योगेन विभासमानं यो मोहबलं निराकरोत्, विभामयं विशेषेण भामस्य कामस्य या श्री येन । गांवि पृथिव्या भया रुचाऽममानम् ॥ १ ॥

ते जिना जयन्ति । कीदृशाः विराः विशिष्टा रा श्रीसि येषां ते । नोदितमानताराः नोदितः स्फेटितो मानो यैस्ते, नोदितमानाश्च ते ताराश्च नोदितमानताराः यान् नरामरेशा यजन्ति । कीदृशाः विराजिनानोदितमाः विराजिनी नानाप्रकारा उदिता मा येषां ते विराजिनानोदितमाः । पुनः किंलक्षणाः नताराः नतं आरं येभ्यस्ते नताराः ॥ २ ॥

हे जिनेश ! ते तव वाक् हितानि देयात् । अरनीत्या मातुमशक्या । अमंदानि गुरूणि कामं भृशं । कीदृशी दमं विस्तारयन्ती । दानिहिता दानिभ्योहिता निकामं ददती । आनिना प्राणिनां कामं वाञ्छितं ददती ॥ ३ ॥

स यक्षाधिपः पातु । किंलक्षणः विभातिरामः विभया कान्त्या अतिरामः श्यामः "स्याद्रामः श्यामलः श्यामः" । अहितकृत् रिपुच्छेदकः सुरावः शोभनशब्दः सः कः यो विभाति शोभते रामो रम्यः हितकृत् सुराव सुरान् अवतीति सुराव ॥ ४ ॥

श्रीमुनिसुव्रत-जिन-स्तुतिः ।

(पृथ्वी छन्द)

नमामि मुनिसुव्रतं जिनमिनं नुतं वित्तमै-
जेरामरणभेदिनं शमितमानबाधामदम् ।

स्मरन्ति जनपावनं भुवननायकं यं हि दु-
जेरामरणभेदिनं शमितमा नवा-धामदम् ॥ १ ॥
जना निजमनो-हि ये जिनपती-नरं निर्म्मलान्,
नयन्ति सुकृताद्रान् विशदकेवलश्रीवरान् ।
भवे परिभवंतु वै विभवदायकाम्नायकान्,
न यन्ति सुकृताऽदरान् विशदके वलश्रीवरान् ॥२॥
जिनेन जननापहं जनित संवर श्रीवरं,
कृतं विकृतिनाशनं दमितमानमायाबलम् ।
मतं वितरदुच्चकैः सह धनेन माभा-च्यलं,
कृतं विकृतिनाऽशनंदमितमानमायामलम् ॥ ३ ॥
स्फुरत्कमलराजिता रचयताच्च गौरी शिवं,
विभूत्तमसमानता सुमतिभूरिताऽराऽदरा ।
करोति हितमत्र या प्रवरगोधिकावाहना,
विभूतमसमाऽनताऽसुमति भूरितारादरा ॥ ४ ॥

व्याख्या—अहं मुनिसुव्रतं नमामि । कीदृशं जरामरणभेदिनं शमितमा-नवाधामद-मानश्च बाधा च मदश्च मानबाधामदाः शमिता मानबाधामदा येन त । तं क ? शमितमा साधवो य स्मरन्ति । कीदृशाः ? नवाः नवीनाः कीदृशं वामव तेजोदायकं पुनः कीदृशं दुर्ज्जरामरणभेदिनं दुर्ज्जरो योऽमोरोग. रणः मश्राम तद्रूपे मे नक्षत्रे दिन दिवसरूप ॥ १ ॥

ये जनाः जिनपतीन् निजमनो नयन्ति । कीदृशान सुकृताद्रान् पुण्या-दरान् विशदाया. केवलश्रियो वरान, ते जना भवे ससारे परिभव न यान्ति न प्राप्नुवन्ति । कीदृशान् सुकृतो निष्पादितोऽदरो मोक्षो यैस्ते तान । कीदृशे भवे विशदके विशत् अकं दुःख यत्र । वल च श्रीश्च ताभ्यां वरान रम्यान् ॥ २ ॥

हे दमितम ! माधो ! मत आनम । कीदृशं जिनेनकृतं विकृतिनाशनं विकारहरं दमितामानमला येन तत् । धनेन सह अदानं वितरत् । कीदृशेन विकृतिना विशेषेण कृतिना कीदृशं आयामलं आयेन लाभेनाऽमल ॥ ३ ॥

गौरी शिवं रचयतात् । कीदृशी विभूत्तमसमानता विभूत्तमा राजानस्तै नेता । सुमतिभूः इमारा इन गतं आर यस्या , अदगा यौऽसुमति प्राणिनि हितं करोति । कीदृग् विभूत्तमसमा विशिष्टं यत भूत्तमं स्वर्णं तत् समा । अनता भूरितारावरा भूरि स्वर्णो तारे रूप्ये च आदरो यस्या सा ॥ ४ ॥

श्रीनमि-जिन-स्तुतिः ।

(शिखरिणी वृत्तम्)

नमिं नाथं नानाभयशमयहरं विश्वविदुरं,
सुदारं वन्देऽहं शमदमकरं तारकमलम् ।
नमन्तीन्द्राः सर्व्वे यमिह सुख हे शुंशुभ ! इशा-
सुदारं वन्देहं शमद-मकलं तारकमलम् ॥ १

जिनव्यूहं वीहंलमिह तत मोहापहमहं,
अयेऽसंसारेशं सदमरहितं कामदमरम् ।
भविभ्यो यो वृत्ते गुरुतरमहो ! सर्व्वविपदा-
अये संसारेशं सदमरहितं कामदमरम् ॥ २ ॥

सुखं दिश्याद्वाणी तव जिनपते ! धौतकलुषा,
क्षमासाराऽकाराऽस्वरकरसमानो-न्नतिकरा ।
तमस्तोमध्वंसे जन-मनज-बोधेव (सु ?) गुरुणा,
क्षमासाराकारा स्वरकरसमानोन्नतिकरा ॥ ३ ।

क्रियात् काली साऽलं कमलनिलया लाभमतुलं,
सुधामाधारा भाजितपरगदा राजितरणा ।

घनश्यामा-यामा वय-चय इभ दारितदरा,
सुधामाधारा भाजितपरगदा राजितरणा ॥ ४ ॥

व्याख्या—अहं नमिनाथं मन्दे स्तुवे । मुदा हर्षेण अरं भृशं शमदम-वरतारकं अलं भृशं, कीदृशं उदारमन्देहं मन्दा ईहा यस्य तं । शमदं शर्म ददातीति । अवरक्षाप्रदं तारकमलं तारा कमला श्री र्यस्य तं ॥ १ ॥

अहं जिनव्यूहं श्रये भजे । कीदृशं असमारेशं असमारो मोक्षस्तस्य नाथ । मत अमरहितं प्रधानदेवानां हितं, कामदमरं कामस्य शर्मं राति ददा-नीति तं । यः ससारेशं दत्ते । कीदृशं मदमररहितं सतो विद्यमाना ये असारो-गास्ते रहितं कामदं अरं ॥ २ ॥

हे जिनपते ! ते तव वाणी सुखं दिश्यात् । कीदृशी-क्षमासारा अकारा न विद्यते कारा गुप्तिगृहं यस्याः सा । अम्बरकरश्चन्द्रस्तत्समाना उन्नतिकरा उ-त्प्राबल्येन नतिकरा, तमस्तोमध्वंसखरकरसमा-सूर्यसमा आनानां प्राणानां उ-न्नति कं च सुखं राति दत्ते या सा ॥ ३ ॥

काली लाभं क्रियात् । कीदृशी सुधामाधारा सुधा अमृतं मा श्रीः तयो धारा भूमिः । कीदृशी भाजितपरगदा भया कान्त्या-जिता परा प्रकृष्टा गदा रो-गा यया सा । राजितरणा राजितसंग्रामा सुधामाधारा सुधाम शोभनं तेजस्तस्य आधारा, भाजितपरगदा भाजिता परा गदा आयुधविशेषो यस्याः । राजि-तरणा रो दीप्रः अजितश्च रणः शब्दो यस्याः ॥ ४ ॥

श्री नेमि-जिन-स्तुतिः ।

(शार्दूलविक्रीडितं वृत्तम्)

श्रीनेमिं तमहं महामि महसा राजीमतीं श्रीयुता,
तरयाजो-र्जितकामरामवपुषं यो गीतरागादराम् ।
मेजे मुक्तिवधूं चयैः कृतनुतिः संख्यावतामलं,
तरया-ऽजोऽर्जितकामरामवपुषं योगीतरागाऽदराम् ॥ १ ॥

नित्यं भक्ति जुषे जिनव्रज ! महानन्दं तमात्मालयं,
मह्यं देहि विभोदितं वितमसं सारं समस्ताधिकम् ।
भीति यत्र न जन्ममृत्युजनिता योगीश्वरैः सर्वदा
मह्यं देहिविभो !ऽदितं वितमसंसारं समस्ताधिकम् ॥२॥
प्राणीत्राणपरायणा जिनपते ! ते भारती पातकं,
धीराऽवद्यतु देव ! मे नवरसाऽपारा गमाराजिता ।
तापं हन्ति सुधेव या हृतमला भव्यांगनाम्नुल्लसद् ,
धीराऽवद्यतु देव मेन ! वरसापा रागमाराजिता ॥ ३ ॥
यामा कुंदफलावली श्रितकरा सिंहासनाध्यासिनी,
विश्वांबाऽवरताऽऽप्रमादपरमालीना सुतारोचिता ।
विघ्नव्रातहराऽस्तु सा निजगुण श्रेणीभृत-प्रोल्लसद्-
विश्वाम्भा वरताप्रपादपरमाऽऽलीना सुतारो-चिता॥४॥

व्याख्या—य राजीमर्ती तत्याज । कीदृशीं ऊर्जितकामरामवपुष ऊर्जित कामेन रामं वपु यस्या स्ता । गीतरागादरा गीतो प्रसिद्धो रागादरो यस्यास्ता । राजी० । क्लिलक्षणा मुक्तिं इतरागादरा गतरागाचासौ अदरा च निर्भया ता याद्यानां तत्या कृतनुतिः अज जन्मरहित , कीदृशीं मुक्तिवधूं अर्जितका-मरा अर्जितका चासौ अमरा च मरणरहिता तां अवपुषं अव तेज पुष्णा ति या ता योगी० ॥१॥

हे जिनव्रज ! मह्य मे त महानन्द देहि । आत्मालय आत्मनः स्थान कीदृशं विभोदित विभया-उदित, वितमसं निष्पापं, सारं समस्ताधिक महयं पूज्य हे देहिविभो ! देहिना स्वामिन ! अदित अखण्डित वित विशिष्टो यत्र त । असंसार न विद्यते ससारो यत्र तं । समस्ताधिक नम्यत्र अस्तो निराकृत आधि यत्र त ॥ २ ॥

हे जिनपते ! ते तव भारती पातकं अवद्यतु । हे देव ! मे मम नवरसा

अपारा पाररहिता, गमाराजिता गमैः आराजिता शोभिता या तापं हन्ति । कीदृशी धीरा धीप्रदा अवद्यतुन , पापछेदिनी हे मेन ! मा श्रीः तस्या इनः स्वामी, वरसापा वरा मा श्रिय पाति या सा । रागमाराजिता रागमाराभ्या अजिता ॥ ३

माच अविका विघ्नघातहराऽस्तु । कीदृशी विश्वाम्बा विश्वमाता अवरता रक्षापरा आम्रपादपरमालीना आम्रवृक्षरमायालीना सुतारोचिता सुताभ्या आरोचिता निजगुण भूतः विश्वा पृथ्वी वरनाम्रपादपरमा वरौ ताम्रौ यौ पादौ ताभ्यां परमा आलीना आलीना सखीना, स्वामिनी सुतारा उज्ज्वला रुचिता ॥ ४ ॥

श्रीपार्श्व-जिन-स्तुतिः ।

(स्रग्धरा छन्दः)

विद्याविद्याऽनवद्यः कमनकमनताऽभंगदोऽभंगदोःश्रीः,
कालोऽकालोपकारी करण करणता मोदितामोदिताऽग्रम् ।
दिश्यादिश्यासकीर्त्ति र्विभवविभवकृत् निर्ममोऽनिर्ममोक्ष-
श्रेयः श्रेयः सपार्श्वः परमपरमताऽऽभोगहा मोगहारी ॥१॥
व्यूहो व्यूहो जिनाना-मुदितमुदितधीभावरोऽभावरोगोऽ-
पायात् पायात्सनामाऽकलितकलितमाः कामदोऽकामदोषः ।
सद्योऽसद्योगहृद्योऽसमरसमरमाऽऽनन्दनो नन्दनोऽकः ।
पुण्योपुण्यो नितांतं जनितजनिततेः कल्पनोऽकल्पनोऽलम् ।२।
सत्या सत्याऽऽरहीनाऽजननजननता सर्व्वदा सर्व्वदाचः,
मारा माराऽऽसवाणी सुरव सुरवराऽऽनन्दिनी नन्दिनीव ।
भव्या भव्याप्तभावाऽनिपुणनिपुणताकृत्तग कृत्तराणा,
कामं कामं प्रदेयादमित दमितमाऽसातदा सा तदात्री ॥३॥
चित्ता चित्तानि-दत्तेऽसुमतिसुमतिदाराञ्चिताऽऽराञ्चितारा

साया मा या विमाया सुकृतसुकृतधीराजिनी राजिनीत्या ।
पातात् पाताद्वरेण्याऽशरणशरणकृद्दानवीदानवीरोत्,
पद्मा पद्मावती नो निभृतनिभृतताऽहीनमाऽहीनभार्या ॥४॥

व्याख्या—विद्या विद्याविदो ज्ञानस्य या विद्या ताभ्या अनवद्यः कमनः कामस्तस्य कमनता-रमणीयता तस्या-भंगदः, अभगदो श्रीः-असगबाहु लक्ष्मी-काल कृष्णवर्णः अकालोपकारी-अकं दुःख तस्य आ सामस्त्येन लोपकारी। पुनः कीदृशः करण-चारित्रं तस्य करणता-कर्त्तृत्व तया मोदिन । मोदिनः-मया श्रिया उदितः अरसपार्श्व श्रेयो मोक्ष दिश्यात्। उरु श्रेयः गुरुकल्याण विभव-, विभवकृत विभवो मोक्षस्तस्य विभवं करोतीति । निर्म्ममो नि स्पृह कीदृशः अनिः निःकाम मम प्रष्ठयन्त । परम प्रकृष्टं यत परमतं तस्य आभोग विस्तारं हन्तीति भोगहारी सर्प्पशरीरशोभितः ॥ १ ॥

जिनाना व्यूह सनाशश्वत् मा-मा अपायात् विघ्नात् पायात् । कीदृश व्यूहः विशिष्टऊहो यस्य सः । उदितमुदितधीभावरः अभावरोगः भावरोगरहितः, अकलितकलितमा -अकलित कलेस्तमो येन मः । कामदः अकामदोषः सद्यस्तत्काले असद्योगहृत्, कीदृशः असमरो यः । नमररतेन आनन्दन, नन्दनोत्कः नन्दनं तत्वचिन्तनं तत्र उत्कः-उत्कंठितः, पुण्योपुण्यः पुण्यस्य ऊः रक्षा तया पुण्य पवित्रः, जनितजनिततेः कल्पनः-छेदक, अकल्पनः-कल्पना रहित, अलं भृशं ॥ २ ॥

आप्तवाणी वो युष्मभ्य कामं भृश काम-वाञ्छित प्रदेयात् । कीदृशी सत्या सती प्रधाना आरहीना अजननजननता-अजनना-जन्मरहिता ये जनाः अर्थाच्चरमशरीरिणस्तैं नेता सर्व्वदा-सदा । सर्व्वदा सर्व्वदात्री । सारा-तत्वरूपा सारा-साश्रिय राति दत्त या सा । सुरवा शोभनशब्दा ये सुरवरा-इन्द्रास्तान् आनन्दयतीति । केव ? नन्दिनीव कामदुघेव भव्याभव्याप्तभावा-भविभि ससारिभिराप्ता यस्याः सा, अनिपुणनिपुणताकृत्तरा-अनिपुणाना निपुणताकृत्तरा निपुणताकर्त्री कृत्तरागा-

क्त छिन्नो रागो यया । अमितदमितमासातदा-अमिता ये दमितमाः मानवस्ते-षाममातं दुःखं द्यति-खण्डयति या सा तदात्री ॥ ३ ॥

सा पद्मावती नोऽस्मान् पातात् पतनात् रक्षतु । सा का या आराधिता सेविता सती वित्तानि दत्ते । कीदृग् वित्ता-प्रसिद्धा आराधितारा-आरम्याऽरिगमनूरस्य आविता-रानि दत्ते या सा । अमृमति-प्राणिनि सुमतिर्दा साया-मलाभा विमाया सुकृतसुकृतधीराजिनी-सुष्ठुकृता सुकृतधीः पुण्यबुद्धि यया सा । ईराजिनीत्या-राजिनी-ईः-श्रीस्तया राजिनी या नीतिस्तया राजिनी, अशरणशरणकृत्-दान-वस्येयं दानवी दाने-वीरा, उत्पद्मा उत्कृष्टा पद्मा-श्री यस्या सा । निभृता-भृता निभृतता-निश्चलता यया सा । अहीनभा-अहीना भा यस्या । अहीनो धरणा-स्तस्य भार्या एवंविधा ॥ ४ ॥

श्रीवीर-जिन-स्तुतिः ।

(स्रग्धरा छन्दः)

वीरस्वामिन् ! भवन्तं कृतसुकृततर्ति हेमगौरांगभासं,
ये मंदन्ते समानदितभविकमलं नाथ ! सिद्धार्थजातम् ।
संसारे दुःखमस्मिन् जितरिपुनिकरा संश्रयन्ते घनापा-
येऽमन्दं ते समानं दितभविकम-लं नाथ सिद्धार्थजातम् ॥१॥
ते जैनेन्द्रा वितन्द्रा विहितशुभशता भूतये सन्तु नित्यं,
पादा वित्तारमादा नरकविकलताहारिणो रीतिमन्तः ।
ये ख्याता भ्रंशयन्ती हितसुखकरणा भक्तिभाजां स्फुरत्सत्-
पादा वित्ता रमादा नर कवि कलता हारिणोऽरीतिमन्तः ॥२॥
पाप-व्यापं हरन्ती प्रकटितसुकृतानेकभावा च सा भू-
चक्रे या मोहहृद्याऽऽचितमतिरुचिताऽनंतगौराऽनुकापम् ।

हत्वा क्रोधादि चौरानरिनिकरहरा मुक्तिमार्गप्रकाशं-
चक्रे या मोहहृद्याचित-मतिरुचिताऽनंतगौरातु कामम् ॥३॥
पायान्नो हंसयानामरनिकरनुता सारदा सारदाना,
पद्मालो नादरामा शुभहृदयमता राजिताक्षामदेहा ।
वीणादंडाक्षमाला कजकलितकरा सुंदराचारसारा,
पद्मालीनाऽदराऽमाशुभहृदयमतारा जिताक्षाऽमदेहा ॥ ४ ॥

व्याख्या—हे वीरस्वामिन ! ये नरा भवतं मंदंते-स्तुवन्ति । कीदृश कृतसुकृततर्ति-सुवर्णोज्ज्वलकान्ति । पुनः किलक्षण समानन्दितभविकमलं समानदिता वर्द्धिता भविना कमला श्री येन तं । हे नाथ ! सिद्धार्थजात-सिद्धार्थनृपतनय, ते नरा अस्मिन् ससारे दु खं न सश्रयन्ते । कीदृशास्ते समान यथास्यात्तथा, जितरिपुनिकरा , कीदृश अमंद, दितभविक-छिन्नकल्याणं अलं भृशं । अथ पुनः सिद्धार्थजातं-सिद्धो निष्पन्नोऽर्थजातो यस्य तं ॥ १ ॥

ते जैनेन्द्रा पादा भूतये सन्तु । कीदृशाः वित्तारमादाः-वित्ताश्च ते अरमादाश्च प्रसिद्धअलक्ष्मीछेदका नरकविकलताहारिण -नरकेषु या विकलता शून्यता ता हरन्तीति, रीतिमन्त -रीतियुक्ता , ते के ये पादा अतश्चित्ते ध्याताः सन्त अरीतिं अशर्यंति, केषा ? भक्तिभाजा । अरीणा इति प्रचुरता ता । कीदृशाः स्फुरत्सत्पादाः-सत्किरणाः, वित्तारमादाः-वित् ज्ञानं तस्य या तारा मार्श्रीः ता ददतीन्येव शीलाः । नरकविकलिताहारिण नरेषु कविषु च कलतया रम्यतया शोभमाना ॥ २ ॥

मानन्तगौ जिनवाग् काम रातु-ददातु । भूचक्रे-धरापीठे, कीदृग् या मोहहृद्या सा म ऊहाभ्या हृद्या आचितमति व्याप्तबुद्धिः उचिता-योग्या या मुक्तिमार्गप्रकाश चक्रे । मोहहृत् याचितं-प्रार्थित अतिरुचिता अनन्तगौरा-शेषवद्गौरा काम-भृश ॥ ३ ॥

सारदा नः पायात । कीदृग् पद्मालो-पद्मो मा पद्मा पद्मायाः आली-

श्रेणि र्यस्या सा । नादरामा शब्दरम्या शुभहृदयमता-शुभहृदया विद्वांसस्तेषां मता, राजिताक्षामदेहा-राजितः शोभितोऽक्षामो देहो यस्याः । पद्मालीना-पद्मे-स्थिता अदरा अमाशुभहृत् रोगाऽकल्याणहरा अयमतारा-अमरणप्रदा जिता-क्षा-जितेन्द्रिया, अमदेहा-मदरहिता ईहा यस्या. सा ॥ ४ ॥

इति श्रीसुन्दरपंडितप्रकांड श्रीसुन्दरमुनि विरचित-
श्रीमच्चतुर्विंशति-जिनाधिपति-
स्तुति वृत्तिः समाप्ता ॥

लिखिता—पं० श्रीवल्लभगणिना ॥

श्रीः ।

आलेखि-मुनि-विनयसागरेण संशोधिताश्च ।